# कठोपनिषदो वेदशाखासम्प्रदायः

*प्रो. श्रीकिशोरमिश्रः*

**'श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः'** इत्येवमैहिकामुष्मिकोभयविधमार्गसन्दर्शन-वैशिष्ट्येन कठोपनिषद् वैदिकवाङ्मये महनीयं गौरवं बिभर्ति। कृष्णयजुषां कठशाखीयेयमुपनिषदद्यत्वेऽप्या च बटोरा च वेदान्तविद्वरिष्ठात्सर्वैः सममेव समाद्रियते। वस्तुतस्तपश्चरणश्रमेण सम्प्रवृत्तः कठसम्प्रदाय इति तदभिधाननिदानेन स्फुटीभवति।

## कठाभिधाननिदानम्

कठशब्दव्युत्पत्तिस्तु – कठति कृच्छ्रेण कृच्छ्रमयशिलोञ्छादिवृत्त्या जीवतीति कठः। **'कठ कृच्छ्रजीवने'** इति धातोर्भौवादिकादयं निष्पन्नः कठशब्दः। अयं कठः श्रुतर्षिः-''**तत्र ये साक्षात्कृतधर्माणस्तेभ्य उपदेशेन श्रुत्वा पश्चाद्ये ऋषयो बभूवुस्ते ऋषिभ्यः श्रुतधर्मात्वच्छ्रुतर्षय इत्युच्यन्ते**'' (1/6/5) इति नैरुक्तव्याख्यानात्। अथवा गुरोर्गृहीतस्वाध्यायस्य पुनरनेकशाखाप्रणेतृत्वात्। अनेन कठर्षिणा प्रोक्तमधीयन्ते विदन्ति वा ये ते सर्वेऽपि कठा एव। तथा च पाणिनिसूत्रं- ''**कठ-चरकाल्लुक्**, (पा. 4/3/107) ततोऽण् ताभ्यां प्रोक्तप्रत्ययस्य लुगित्यर्थः।''

एवञ्च कृच्छ्रतपश्चरणात्मकजीवनेन व्रतनिष्ठः कठ इत्यवगम्यते। सोऽयं कठश्चरकापराभिधानस्य वैशम्पायनस्य शिष्यः। कठानां चरकसमाख्याप्यध्ययनव्रतगाम्भीर्येण प्रथितेति श्रीमच्छङ्करभगवत्पादानाम् 'अध्ययनार्थं व्रतचारणाच्चरका' इति बृहदारण्यकभाष्योक्त्या ज्ञायते। कठशाखाध्येतृसम्प्रदायप्रवर्तनं पुराणेषूपदिश्यते।

## काठकशाखा

काठकी शाखा सकलयजुर्वेदाध्यापकमहर्षिवैशम्पायनप्रवर्तितस्य यजुर्वेदशाखाकदम्बकस्य प्रधानभूतासु सप्तविंशतिशाखासु कठमुनिप्रवर्तिताऽन्यतमा। तथा च **विष्णुपुराणे** तृतीयेंऽशे पञ्चमेऽध्याये-

**यजुर्वेदतरोः शाखाः सप्तविंशन्महामतिः। वैशम्पायननामाऽसौ व्यासशिष्यश्चकार वै॥**
**शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात्॥** इत्यादि (1-2)

सप्तविंशतिः यजुषः प्रधानाः शाखा इति वैष्णवाकूतचंद्रिकाव्याख्यातारः। वैशम्पायनस्यैवापरं नाम चरकाचार्य इति। तथा च **काशिकावृत्तौ 'कलापिवैशम्पायनान्तेवासिभ्यश्च, कठचरकाल्लुक्'** इत्येतत्पाणिनीयसूत्रयोः- **'वैशम्पायनान्तेवासिनो नव, चरक इति वैशम्पायनस्याख्या, तत्सम्बन्धेन सर्वे तदन्तेवासिनश्चरका इत्युच्यन्ते'** इति।

## कठचरकाणां व्रतमहत्ता

अध्ययनसम्प्रदाये गुरोर्माहात्म्येन, गुरुकुलस्य श्रद्धातिशयेन चान्तेवासिभिस्तदभिधानं सादरं स्मर्यते, धार्यते चेत्यद्यत्वेऽप्यनुभूयते। परमत्र कठसम्प्रदाये शिष्याणां चरकाणां तपोव्रतनिष्ठया गुरुणा तदभिधानमङ्गीकृतमिति किञ्चनापूर्वं माहात्म्यं कठानाम्। चरकपदनिरुक्तिप्रसङ्गेनायं विषयः समुपस्थाप्यते पुराणेषु।

चरकशब्दनिर्वचनं **वायुपुराणे** पूर्वार्धे द्विषष्टितमेऽध्याये एवमस्ति-

**ब्रह्महत्या तु यैश्चीर्णा चरणाच्चरकाः स्मृताः। वैशम्पायनशिष्यास्ते चरकाः समुदाहृताः॥23॥** इति।

तथा **श्रीमद्भागवते** द्वादशे स्कन्धे षष्ठेऽध्यायेऽपि-(61)

**वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन्। यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतम्।इति दृश्यते।**

तथाऽन्यत्रापि वेदमुक्ताफलविमर्शे-

**यदर्थं तैर्व्रतं चीर्णं ब्रह्महत्यापनोदकम्। आचार्यः सोऽपि च तद्योगाच्चरकाख्यामवाप्तवान्। इति।**

यदर्थमिति यस्याचार्यस्य कृते इत्यर्थः। तद्योगादिति तेषां ब्रह्महत्यापनोदकव्रतचारकशिष्याणां संयोगादित्यर्थः।

## चरककठानां कृष्णयजुष्ट्वैतिह्यम्

भगवल्लीलाप्रयुक्तेन लोकोपकृतिविधानेनार्षशास्त्राणामाविर्भावो विस्तरश्च प्रतिकल्पं प्रवर्तत इति सनातनः सिद्धान्तः। वेदाविर्भावो विभागश्च तथैवैतिह्यदिशा प्रोच्यते पुराणेषु। कल्पादौ भगवता श्रीविष्णुना शंखासुरापरनामानं हयग्रीवदैत्यं व्यापाद्य तदाहृतो वेदः ब्रह्मणे प्रदत्तः। इयमाख्यायिका **वराहपुराणादौ** प्रसिद्धा।

यजनार्थप्राधान्यात् पुरा तेषाम् ऋग्यजुःसामाथर्वसमूहानामेकराशिभावेन स्थितत्वाद्यजुर्वेद इतीयं यौगिकी समाख्याऽऽसीत्। अनन्तरं श्रीवेदव्यासेन तेषां यज्ञप्रकरणानुरोधेन व्यसनादृगादिवेदसंज्ञा रूढा बभूवुः। स चेतिहासः -

**''एक एवासीद्यजुर्वेदस्तं चतुर्धा व्यकल्पयत्। चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमकल्पयत्॥**

**आध्वर्यवं यजुर्भिस्तु ऋग्भिर्वै हौत्रमेव च। औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः॥**

**ब्रह्मत्वमकरोद्यज्ञे वेदेनाथर्वणेन तु। ततः स ऋचमुद्धृत्य ऋग्वेदं समकल्पयत्॥**

**होतृकं कल्प्यते तेन यज्ञवाहं जगद्धितम्। सामभिः सामवेदं च तेनौद्गात्रमरोचयत्।**

**राज्ञस्त्वथर्ववेदेन सर्वकर्माण्यकारयत्॥'' इत्यादिभिर्वायुपुराणे सुस्पष्टः।**

सोऽयं धर्मादिचतुर्वर्गहेतुः कर्मोपासनाज्ञानेतिस्कन्धत्रयवान्वेदो द्वापरान्ते कलेरादौ संधिसमये भगवता कृष्णद्वैपायनेनाल्पप्रज्ञलोकानुजिघृक्षया विव्यस्तः। तन्निदानभूतैव कृष्णद्वैपायनस्य वेदव्यास इतीयं संज्ञा। तथा चोक्तं **महाभारते** आदिपर्वणि चतुःषष्टितमेऽध्याये -

**ब्रह्मणो ब्राह्मणानां च तथाऽनुग्रहकाङ्क्षया। विव्यास वेदान्यस्मात्स तस्माद् व्यास इति स्मृतः॥**

**वेदानध्यापयामास महाभारतपञ्चमान्। सुमन्तुं जैमिनिं पैलं शुकं चैव स्वमात्मजम्॥**

**प्रभुर्वरिष्ठो वरदो वैशम्पायनमेव च। संहितास्तैः पृथक्त्वेन भारतस्य प्रकाशिताः॥ इति।**

अत्र महाभारतपदं पुराणोपलक्षकमपि। 'पुराणं पञ्चमो वेदः, पुराणसंहितां चक्रे' इत्यादिभिस्तेषां वेदसंहितावदुल्लेखसमन्वयात्।

स्पष्टमेभिर्वचोभिर्ज्ञाप्यते यत् - ऋगादिभेदेन विभक्तेषु वेदेषु ऋग्वेदाध्येता पैलो, यजुर्वेदाध्येता वैशम्पायनः, सामवेदाध्येता जैमिनिरथर्वाऽध्येता सुमन्तुर्महाभारताद्यध्येता शुकश्चेति मूलभूतास्तत्तद्वेदाचार्या इति।

तत्रापि वेदे तावत् द्वौ सम्प्रदायौ -- एको ब्रह्मसम्प्रदायोऽपरश्चादित्यसम्प्रदायः। तत्र कठा ब्रह्मसम्प्रदायान्तर्भुक्ताः।

## कठानां ब्रह्मसम्प्रदायान्तर्गतत्वम्

सर्गादौ निःश्वासरूपेणाविर्भूतो वेदराशिर्ब्रह्मण इति पुराणेषु प्रथितम्। ब्रह्मा च तं द्वेधा विभज्यैकं भागं भगवत्यादित्ये निहितवान्। अन्यं च भागं स्वपुत्रादिभ्यो वसिष्ठांगिरोमरीच्यत्रिप्रभृतिभ्योऽध्ययनविधिना प्रायच्छत्। तेऽपि स्वपुत्रपौत्रप्रपौत्र-शिष्यप्रशिष्येभ्यः प्रायच्छन्। ततोऽग्रे द्वापरान्ते भगवान्वेदव्यासोऽल्पप्रज्ञानल्पशक्तींल्लोकाननु-जिघृक्षुः एकं वेदं ऋग्यजुःसामाथर्वभिदा चतुर्धा व्यस्य क्रमात्पैलवैशंपायनजैमिनिसुमन्तूनध्यापयामास। तैश्चैते वेदा अग्रे शाखाप्रभेदादिना परंपरया विस्तरं नीताः। सैषा वेदचतुष्टयी ब्रह्मसम्प्रदायः इति प्रसिद्धिं लेभे।

तच्च स्पष्टमभिहितं जाबालसंहितायां-

**''ब्रह्मणःसम्प्रदायोऽयं व्याससंदर्शितोऽभवत्। विभक्तस्यैव वेदस्य सम्प्रदायो द्विधा मतः॥**

**ब्रह्मणःसम्प्रदायस्तु आदित्यस्य तथा मतः। अयातयामसंज्ञोऽयं कृत्स्नकर्मप्रकाशकः॥**

**यावद्ब्रह्मप्रकाशको रविरूपश्च यो मतः। ब्रह्मणःसम्प्रदायस्तु मिश्रत्वान्न तथा मतः॥''** इति (जा.सं.अ.1)

भगवान्योगीश्वरो याज्ञवल्क्योऽप्यस्यां ब्रह्मपरम्परायामेव वर्तमानः सन्महर्षेर्विदग्धशाकल्यादृग्वेदं स्वमातामहाद् मातुलाद्वा वैशम्पायनाच्च यजुर्वेदमधिजगे। परन्तु वेदशाखाविस्तरविधौ आदित्यसम्प्रदायप्रकाशन-लीलाङ्गतया शिष्येषु समत्वानुशासनशिक्षणधिया च गुरुर्वैशम्पायनः काञ्चिद् स्वविचारितां मानसिकीं ब्रह्महानिं ब्रह्महत्यासमां सङ्कल्प्य जनेषु शास्त्रमर्यादोदाहरणार्थं तन्निराकरणाय स्वकीयासामर्थ्यं प्रकाशयन् तत्प्रायश्चित्तविधानार्थं शिष्यगणं समादिदेश। किन्तु याज्ञवल्क्यो भगवत्प्रेरितः स्वस्यैकाकिनस्तपःसामर्थ्येन पातकापनोदनक्षमत्वं निरूपयन् गुर्वाज्ञासतीर्थ्या-वमानापराधोद्विग्नःसन् गुर्वाज्ञामनुसृत्य तदधीतं वेदं त्यक्तवान्। ततश्च पुनरपि वेदवर्जितो याज्ञवल्क्य इदानीमहं मानुषमाचार्यं नोपैमीति निश्चयपूर्वकं सुदृढं तपस्तप्त्वा भगवन्तं त्रयीमयमादित्यं सन्तोष्य तस्माच्चतुरो वेदानृग्यजुःसामाथर्वाख्यांश्चाधिजगे। गुर्वनुज्ञया च तान् शाखाप्रशाखादिभिदा परम्परया वितेने। सैषा वेदचतुष्टयी आदित्यसम्प्रदायः इति प्रसिद्धिमापन्ना। तत आदित्यसम्प्रदाये शांखायनादिभ्यः **ऋग्वेदस्य** शांखायनी (कौषीतकी) शाखा, **शुक्लयजुर्वेदस्य** माध्यन्दिनादिपञ्चदशशाखाः, **सामवेदस्य** सामश्रवसे कौथुमशाखा, **अथर्ववेदस्य** शौनकप्रभृतिभ्यश्च शौनकिशाखाद्याः याज्ञवल्क्याध्यापिताः स्मर्यन्ते। आदित्यसम्प्रदायान्तर्गतानां शाखानां विस्तरः **शतपथब्राह्मण**भाष्यभूमिकायां द्रष्टव्यः।

ननु-याज्ञवल्क्येन तु रवेः केवलं यजूंष्येव समधिगतानीति **श्रीमद्भागवतादिषु** प्रसिद्धेः इति चेन्न।

''**स तथेति प्रतिज्ञाय प्रविश्यादित्यवाजिनः। कर्णेऽपठत्ततो वेदांश्चतुरोऽपि च तन्मुखात्॥**'' **इति**

(स्कांदे नागरखण्डे अ. 278)

तथा—''**इत्युक्तो भगवान्सूर्यो याज्ञवल्क्यं महामुनिम्। वेदान्षडंगसहितान् रहस्यादिसमन्वितान्।**
**चतुरोऽध्यापयामास स्थापयित्वा रथे निजे॥**'' (आत्मपुराणे अ. 7/38-40)

इतिपुराणद्वयप्रामाण्येन याज्ञवल्क्यस्य चतुर्वेदोपदेष्टृत्वं सिद्ध्यति। अतः श्रुतिव्याख्यानप्रसङ्गे श्रीमच्छङ्करदेशिका अपि याज्ञवल्क्यस्य चतुर्वेदवित्त्वमभिप्रयन्ति।

यथा- ''**हे सामश्रवः। सामविधिं हि शृणोत्यतोऽर्थाच्चतुर्वेदो याज्ञवल्क्यः**'' **इति**

(बृ.आ.उप.भाष्ये 3/1/3)

तदेतैः प्रमाणैः स्पष्टं भवति यद्याज्ञवल्क्येन रवेर्वेदचतुष्टयी लब्धेति।

आदित्यसम्प्रदायप्रकाशनार्थायां लीलायामस्यां ब्रह्महानिकल्पनाया अपि दुर्निवारता, गुर्वाज्ञायाः कथमप्यनतिक्रमणीयता, सतीर्थ्यानामवराणामपि सम्मानार्हतेत्याद्युपदिश्यते।

## कठचरकाणां तैत्तिरीयप्रसिद्धिः

कठप्रमुखा वैशम्पायनशिष्यास्सर्वे चरकाख्यामाप्तवन्त इति श्रीमद्भागवताद्युल्लेखैरवगम्यते। ते तैत्तिरीयाख्यामप्यापुरित्याख्यातं पुराणेषु। तथा च तत्र कारणं-योगीश्वरयाज्ञवल्क्येन महर्षिणा श्रीवैशम्पायनाचार्येणाध्यापितो यजुर्गणश्छर्दित्वा विसृष्टः। तं विसृष्टं यजुर्वेदं देशिकवरवैशम्पायनमुनिनिदेशात्कठो वारायण उपमन्युश्चैते त्रयस्तच्छिष्यवर्याश्चरकास्तित्तिरिरूपमासाद्य जगृहुरिति। अतस्ते त्रयस्तैत्तिरीया अभवन्। **तैत्तिरीयाः** कृष्णयजुषश्चेति नार्थान्तरम्। स्पष्टमेतेनैतिह्येन कठानां कृष्णयजुष्ट्वं ज्ञापितं भवति। तथा चोक्तं **विष्णुपुराणे**-

''**यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज। जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः॥**'' **इति।**

**श्रीमद्भागवतेऽपि**-

''देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान्।
यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः। तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः॥'' **इति।**

'ददृशुः, जगृहुः, आददुः,' इत्येते शब्दास्तात्पर्यत एकार्था एव मन्तव्याः। स चायमितिहासः स्पष्टमुक्त उपनिषद्रत्ने आत्मपुराणे दशमाध्याये-

**यदैनमुक्तवान्कोपान्मुञ्च विद्यां मयेरिताम्। याज्ञवल्क्यस्य गुरुः श्रीमान्वैशम्पायननामकः॥**
**अष्टाङ्गयोगवित्तस्य शिष्यो वाजसनेयकः। करिणीकर्ममार्गेण विद्यां चच्छर्द सोऽपि ताम्।**
**भूमौ यजूंषि तान्यासन्सूर्यवर्चांसि सर्वतः॥**
**मुक्तानि याज्ञवल्क्येन वैशम्पायनवाक्यतः। सर्वतः स्थितमालोक्य दीप्तं तं यजुषां गणम्।**
**वान्तं शिष्येण सम्प्राह वैशम्पायनदेशिकः॥**
**शिष्यानन्यानिदं वाक्यं विस्मयाविष्टचेतसः। यथाशास्त्रमधीतानि यजूंषि मुनिसत्तमाः॥**
**याज्ञवल्क्येन मुनिना सूर्यवर्चांसि तान्यतः। गृह्णीध्वं सहसा विप्रास्त्वरितं ब्रह्मणः सभाम्।**
**इत उत्प्लुत्य गच्छन्ति नैतान्यस्मद्धनानि भोः। वान्तानीति विचारं मा कुरुत ब्राह्मणोत्तमाः॥**
**शरीरान्तरतो वान्तं भक्ष्यं भवति देहिनाम्। ततस्तित्तिरिरूपाणि कृत्वा झटिति योगतः॥**
**दिवि भूमौ प्रसर्पन्ति गृह्णन्तु मुनिसत्तमाः। एवमुक्ते मुनिगणास्तेन तित्तिरिरूपिणः॥**
**यजूंषि जगृहुः शीघ्रं सूर्यभानि समन्ततः। यथा तित्तिरयो लोके पतङ्गान्सर्वतः स्थितान्॥**
**भक्षयन्ति क्षुधाक्रान्ता भूमौ वा नभसि स्थितान्। एवं मुनिगणः सोऽयं तित्तिरिः परिकीर्तितः॥**
**वान्त्या च भक्षणेनापि कृष्णान्यासन्यजूंष्यपि॥ इति॥**

अत्र-करिणीकर्म-गजवत्पीतस्योद्धरणं, तद्रीत्येत्यर्थः। सूर्यवर्चांसि सर्वतः-अभिमानिदेवरूपेण सूर्यवद्भास्वरमूर्त्तयो भूमौ सर्वतोऽवकीर्णा यजुर्मन्त्रा इत्यर्थः। वान्तानीति-अत्र वान्तत्वमालोच्य विलम्बो न कार्यः, देहान्तरेण वान्तभक्षणे दोषाभावादिति भावः। शिष्यानन्यान् - मुनिगणाः कठवारायणोपमन्युप्रभृतय इति यावत्। एवं मुनिगणः- एवंप्रकारेण स यजुर्वेदाध्ययनशीलो मुनिगणः कृष्णयजुष्ट्वं गत इत्यर्थः।

### कठशाखीयानां विस्तरातिशयः

'ग्रामे ग्रामे काठकं कालापकं च प्रोच्यते' (अधीयते) इतीयं पतञ्जल्युक्तिः (म.भा. 4/3/101) कठशाखायाः प्रतिदिशं प्रचारं प्रमिमीते। प्राचीनयुगे कठशाखाध्ययनस्यात्यर्थं प्रकर्ष आसीदित्यवितथम्। यादृशो दैशिकप्रसारः काठकाध्येतृणां तदानीमभून्न तादृशो वेदान्तरशाखीयानामासीदिति विशेषः काठकानाम्। देशभेदात् कठानां भेदास्त्रयो यवनदेशे ऽप्यभूवन्निति महदाश्चर्यावहं स्यादैतिह्यविदाम्। देशभेदेन त्रयोदशविधाः कठा दृश्यन्ते। ते च-

| | |
|---|---|
| 1. पिञ्जुलकठाः | क्रौञ्चद्वीपे। |
| 2. औदलकठाः | शाकद्वीपे। |
| 3. सपिच्छलकठाः | शाकद्वीपे। |
| 4. मुद्गलकठाः | काश्मीरदेशे। |
| 5. शृङ्गलकठाः | सृंजदेशे। |
| 6. सौभरकठाः | सिंहलदेशे। |
| 7. मौरसकठाः | कुशद्वीपे। |
| 8. चुचुकठाः | कुशद्वीपे। |
| 9. योगकठाः | यवनदेशे। |
| 10. हपिलकठाः | यवनदेशे। |
| 11. दौसलकठाः | सिंहलदेशे। |

12. घोषकठाः क्रौञ्चद्वीपे।

13. जृम्भकठाः श्वेतद्वीपे। इत्येवं त्रयोदश।

एते त्रयोदश भेदा न शाखाभेदमूलाः किन्तु देशभेदमूला इत्यधिगन्तव्यम्।

शाखाभेदे त्वेतेषां प्राच्योदीच्यमध्यदेश्याख्यभेदत्रयेण नवकत्रितयं प्रतिपाद्यते। तथोक्तं ब्रह्माण्डपुराणे पूर्वदले पञ्चत्रिंशदध्याये–

**षडशीतिस्तथा शिष्याः संहितानां विकल्पकाः। सर्वेषामेव तेषां वै त्रिधा भेदाः प्रकीर्तिताः॥**
**त्रिधा भेदास्तु ते वेदभेदेऽस्मिन्नवके शुभे। उदीच्या मध्यदेश्याश्च प्राच्याश्चैव पृथग्विधाः॥**
**श्यामायनिरुदीच्यानां प्रधानः सम्बभूव ह। मध्यदेश्यप्रतिष्ठाता चारुणिः प्रथमः स्मृतः॥**
**आलम्बिरादिः प्राच्यानां त्रयो देश्यादयस्तु ते। इत्येते चरकाः प्रोक्ताः संहितावादिनो द्विजाः॥इति॥**

**महाभाष्ये काशिकायाञ्च** (4/2/138, 4/3/104) कठानां देशभेदेन शाखाविस्तरः उक्तः। तत्त्वबोधिन्यां (4/3/104) शाखाविस्तरक्रमे – 'वैशम्पायनान्तेवासी कठः, कठान्तेवासी खाण्डायनः, वैशम्पायनान्तेवासी कलापी', इति। तत्रैव पुनर्वैशम्पायनान्तेवासिनो नवेत्युक्तम्।

वैदिकशाखाविस्तरप्रतिपादनपरे चरणव्यूहे कठानां देशविस्तारसङ्केतोऽप्युपलभ्यते। तथोक्तम्–तत्र कठा द्वादश–चरकाः, आह्वरकाः, भ्राजिष्ठलकठाः, प्राच्यकठाः, कपिष्ठलकठाः, वारायणीयाः, चारायणीयाः, श्वेताः, श्वेताश्वतराः, औपमन्यवः, पाताण्डिनेयाः, मैत्रायणीयाः, इति।

## कठर्षिपरिचयः

कठर्षेः परिवारसम्बन्धो विदर्भदेशेनासीदिति ब्रह्माण्डपुराणादवगम्यते। सायणार्यः कठर्षेः श्वशुरगृहं शुक्लतीर्थेऽभिप्रैति। तथा चोक्तं तैत्तिरीयब्राह्मणस्य (3/10/11) वेदार्थप्रकाशव्याख्याने – बार्हस्पत्यः अङ्गिरसः पौत्रः परमधार्मिको भरद्वाजाख्यो महामुनिर्गौतमीतीरे शुक्लतीर्थे बभूव। तस्य परमसाध्वी पैठिनसी – नाम्नी भार्या आसीत्। तस्य भरद्वाजस्य मुनेर्भगिनी रेवती – नाम्नी, तस्या रेवत्याः पतिः कठो नाम ऋषिः, इति।

एतच्च शुक्लतीर्थं गोदावर्या दक्षिणे तटे अब्जक–(नांदेड) क्षेत्रादनन्तरं वाणीसंगमतीर्थात्प्राक्प्रदेशे वर्तते इति **ब्रह्मपुराणा**न्तर्गतगोदामाहात्म्यस्य द्विषष्ट्यध्यायतः प्रतीयते। किञ्च – उत्कलप्रान्ते जगन्नाथपुरीक्षेत्रासन्न – 'कटक' संज्ञस्य प्रदेशविशेषस्य कठेन सम्बन्धःप्रतीयते, तस्य प्राच्यदेशान्तर्भूतत्वात्।

**महाभाष्यकृता** – कठं महत्सुविहितमिति (4/2/66) प्रतिपादयता तद्वैशिष्ट्यं प्राकाशि। काश्मीरेषु शैवमतं कठशाखिनामेव। प्राक्तनकाले कठशाखा कूर्माचल–काश्मीर–पञ्चनद–हिमाचल–गान्धारप्रदेशेष्वासीदद्यत्वे च कठशाखाध्यायिनः काश्मीरेष्वेवोपलभ्यन्त इति भगवद्दत्तनिरूपणादुत्तरदिग्भावित्वमपि (वै.वा.इ. पृ. 287–289) कठानां ज्ञायते। कठर्षेः भरद्वाजो मुनिः श्यालकस्तद्भगिनी रेवती – नाम्नी पत्नी चेत्यनुपदमेव विनिर्दिष्टम्। कठर्षेर्विशेषेतिवृत्तं ब्रह्मपुराणान्तर्गतगोदामाहात्म्ये पञ्चाशत्तमे ऽ ध्याये समुपवर्णितं, तदेवात्रोपस्थाप्यते। तथा हि–

**विदर्भसङ्गमं पुण्यं रेवतीसङ्गमं तथा। तत्र यद्वृत्तमाख्यास्ये यत्पुराणविदो विदुः॥1॥**
**भरद्वाज इति ख्यात ऋषिरासीत्तपो ऽ धिकः। तस्य स्वसा रेवती कुरूपा विकृतस्वना॥2॥**
**तां दृष्ट्वा विकृतां तात भरद्वाजः प्रतापवान्। चिन्तया परया युक्तो गङ्गाया दक्षिणे तटे॥3॥**
**एवं विमृश्यतस्तस्य स्वाश्रमे चातिशोभने। द्रष्टुं मुनिवरः प्रायाद्भरद्वाजं यतव्रतम्॥6॥**
**कठो ऽ प्याह भरद्वाजं विद्यार्थ्यहमुपागतः। तथा त्वद्दर्शनाकांक्षी यद्युक्तं तद्विधीयताम्॥9॥**
**भरद्वाजः कठं प्राह अधीष्व यदभीप्सितम्। पुराणं स्मृतयो वेदा धर्मशास्त्राण्यनेकशः॥10॥**

**शुश्रूषणरतं भक्तं कुलीनं सत्यवादिनम्। तथेत्युक्त्वा भरद्वाजः प्रादाद्विद्यामशेषतः॥13॥**
**प्राप्तविद्यः कठःप्रीतो भरद्वाजमथाब्रवीत्। इच्छेयं दक्षिणां दातुं गुरो तव मनःप्रियाम्॥14॥**
**सर्वं स्मृत्वा कठाद्य त्वं रेवतीं भर तन्मनाः। तथेत्युक्त्वा गुरोर्वाक्यात्कठो जग्राह पाणिना॥19॥**
**पुण्यरूपत्वसंसिध्यै विदर्भा तदभून्नदी। श्रद्धया संगमे स्नात्वा रेवतीगङ्ग्योर्नरः॥24॥**
**स्नानं करोत्यसौ याति भुक्तिमुक्ती क्षणात्ततः। उभयोस्तीरयोस्तत्र तीर्थानां शतमुत्तमम्॥26॥**

यदा कठर्षेः शिष्यप्रशिष्यप्रवृध्या शाखाद्वादशकरूपो विस्तरः समभवत्तदा ते सर्वे चरकादिद्वादशशाखिनो मध्यदेशमुषितवन्तः। तन्मूलको 'मध्यदेश्या' इति व्यपदेशः। पुनस्ते क्रौञ्चद्वीपाद्यनेकदेशं गत्वा तत्र तत्रावासं चक्रुरिति। इदानीमपि आन्ध्रसन्निहितगोदादक्षिणदेशे चरकादयो ग्रामज्योतिर्वित्त्वेन वृत्तिमन्त उपलभ्यन्ते।

### श्रीरामश्रीकृष्णयोः काले कठमहत्त्वम्

त्रेतायुगे भगवतः श्रीरामचन्द्रस्य दानसत्पात्रत्वेन कठशाखाध्येतारो ब्रह्मचारिणोऽभिप्रेता इति वैशिष्ट्यं स्फुटीभवति कठानाम्। तदुक्तं वाल्मीकीये रामयणेऽयोध्याकाण्डे वनं प्रविवक्षोः श्रीरामस्य धनस्य विभज्य दानप्रसङ्गेण द्वात्रिंशत्तमे गर्गे–

**कौसल्यां च य आशीर्भिर्भक्तः पर्युपतिष्ठति। आचार्यस्तैत्तिरीयाणामभिरूपश्च वेदवित्॥15॥**
**पशुकाभिश्च सर्वाभिर्गवां दशशतेन च। ये च मे कठकलापा बहवो दण्डमाणवाः॥18॥ इति।**

तथा तदीयं तिलकव्याख्यानं–"तैत्तिरीयाणां तैत्तिरीयशाखाध्येतृणामाचार्यो यो द्विज इति। कठकलापाः कठकलापसम्बन्धिशाखाध्यायिनः। दण्डमाणवाः दण्डप्रधाना माणवा उपकुर्वाणब्रह्मचारिणः" इति। स्पष्टमत्र व्याख्याने कठकलापशब्दाभ्यां तत्तन्नाम्नी शाखा निर्दिष्टा। अनेन श्रीरामस्य कठशाखाप्रीतिरवगम्यते।

अयं कठकलापानामुल्लेखो न तत्तन्नामकभूतपूर्वतत्कालवर्तिव्यक्तीरभिप्रैति। किन्तु तत्तच्छ्रुतिविभागानां भविष्यत्याः प्रवचनातिशयनिमित्तकशाखासंज्ञाया निदर्शनत्वमभिप्रैति। संज्ञाव्यवहारश्च बहुधा बहुत्र भाविनीं सिद्धिमादायैव भवति, '1. अष्टवर्षं ब्राह्मणमुपनयीत', '2. भार्यामुपयेमे', '3. ओदनं पच', '4. अस्य सूत्रजालस्य शाटकं वय', '5. पुत्रमुत्पादय', इत्यादिवैदिकलौकिकव्यवहारादौ प्रायशस्तथा दर्शनात्। अतएव श्रीधराचार्याः श्रीमद्भागवतटीकायां तत्र तत्र "अवश्यंभावित्वात्सिद्धवन्निर्देशः" इति व्याचख्युः। न चैवं व्याख्याने विनिगमनाविरहः पौराणिकैः प्रत्यक्षादिप्रमाणषट्कातिरिक्तसाम्भविकैतिह्ययोः प्रमाणयोः प्रतिज्ञातत्वात्ताभ्यामृते बहूनां पुराणांशानामसङ्गत्यापत्तेश्च।

किञ्च काठकसंहितोक्तं (10/6) दाल्भ्याख्यानं महाभारते समुद्धृतं, यथा - महाभारते शल्यपर्वणि स्पष्टमाम्नातम्–

**ययौ राजंस्ततो रामो बकस्याश्रममन्तिकात्। यत्र तेपे तपस्तीव्रं दाल्भ्यो वक इति श्रुतिः॥** (अ. 41/32)

तथा– **'यत्र दाल्भ्यो वको राजन्पश्वर्थं सुमहातपाः। जुहाव धृतराष्ट्रस्य राष्ट्रं कोपसमन्वितः॥**
**तानब्रवीद्वको दाल्भ्यो विभजध्वं पशूनिति।** (अ. 42/1-5) इत्यादि।

तथा महाभारते वनपर्वणि–

**अथाब्रवीद्वको दाल्भ्यो धर्मराजं युधिष्ठिरम्। सन्ध्यां कौन्तेयमासीनमृषिभिः परिवारितम्॥** (26/1)

अत्राख्यानोपलब्धेर्न काठकश्रुतेरनित्यत्वं कल्प्यम्। तस्य नित्येतिहासत्वात्, जैमिनिनये अनित्यदर्शनाच्चेति पूर्वपक्षमुपस्थाप्य तस्य निराकृतत्वाच्च।

किञ्च काठकादिसमाख्याभिः प्रथितानां श्रुतिभागानामपि वेदविभागात्पूर्वं सर्वशाखासमूहात्मकवेदकदम्बके विद्यमानत्वान्न त्रेताद्वापरादिभविष्यत्प्रसङ्गानां शाखासंहितासु निर्देशो विरुद्ध्यते।

एवमभ्युपगमे हि - "धाता यथापूर्वमकल्पयत्" (नारा. उप.) इत्येवं श्रुतिमूलकः "यः कल्पः स कल्पपूर्वः" इति न्यायोऽप्यनुगृहीतो भवति।

ननु-ऐतिहासिकैर्द्वापरान्ते कल्यादिसन्धिश्च वेदकालत्वेनाङ्गीकृतः। अन्यथा तैरुन्नीत इतः पूर्वः षट्सहस्र-(6000) संवत्सरात्प्राग्भूतो वेदकालनिश्चयस्तद्गमकानि च व्याकुप्येरन्। अतः कथं तद्विरूद्धमाभाष्यत इति चेत्तत्रोच्यते। ऐतिहासिकैर्निर्धारितो वेदकालो न वेदस्यापूर्वाविर्भावभावकतया किन्तु ऋगादिवेदचतुष्टयतत्तदवान्तरानेकशाखाप्रशाखालक्षणस्यावान्तरविभक्तिप्रभावकतयैव सम्मन्यते। अतो नोक्तविरोधः।

## सर्वशाखाप्रतिनिधितया कठोल्लेखः

कठशाखायाः प्रभूतप्रचारेण सर्वजनसमादृतत्वात् सर्ववेदशाखासु प्रमुखतया निर्देशो विधीयते शास्त्रकृद्भिरिति विशेषः कश्चन। जैमिनीय-पूर्वमीमांसासूत्रेषु 'आख्या प्रवचनात्' (1/1/30) इत्यस्य भाष्ये शबरस्वामिन आहुः- "यदुक्तं कर्तृलक्षणा समाख्या काठकाद्येति। तदुच्यते। नेयमर्थापत्तिः। अकर्तृकाभिरपि ह्येनामाचक्षीरन्। प्रकर्षेण वचनमनन्यसाधारणं कठादिभिरनुष्ठितं स्यात्। तथापि हि समाख्यातारो भवन्ति। स्मर्यते च वैशम्पायनः सर्वशाखाध्यायी, कठः पुनरिमां केवलां शाखामध्यापयाम्बभूवेति।"

अत्र माधवाचार्येणापि न्यायमालायाम् — 'काठकादिसमाख्यानात्' इत्थं कठ एव शाखाप्रवर्तकानां प्रतिनिधित्वेन निर्दिश्यत इति माहात्म्यम्।

## कठशाखायाः स्वरोच्चारणादिवैशिष्ट्यम्

कठानां स्वरोच्चारणादौ शाखान्तरेभ्यो महद्वैशिष्ट्यमासीत्। 'कठः स्वरे ऋचां भेदे' इति विश्वकोषाद्युल्लेखेनावगम्यते कठस्वरोऽनितरवेदसाधारणः।

पदस्वरूपेष्वपि कठस्यैव वैशिष्ट्यमुच्यते पाणिनिनये। 'देवसुम्नयोर्यजुषि काठके' (पा. 7/4/38) इत्यनेन कठमात्रयजुश्शाखायां 'देवायन्त' इति पदस्वरूपं प्रसाध्य शाखान्तरापेक्षया कठशाखाया अधिकः प्रसारो महिमा च ज्ञाप्यते। 'देवयन्त' इत्यन्यशाखासु पदस्वरूपं नियम्यते। तन्निरूपयति-बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणमिति हरदत्तः।

## काठकश्रुतीनां शास्त्रकृत्सु समादरः

सूत्रस्मृत्यादिभाष्यकृद्भिर्भूयान् समादरः प्रकाश्यते कठश्रुतिषु। 'मनुर्वै यत् किञ्चावदत्तद् भेषजम्' इतीदं प्रसिद्धमुद्धरणं कठश्रुतितः कुल्लूकभट्ट उल्लिखति मनुस्मृतिव्याख्यायाम्।

एवमेव **पातञ्जलमहाभाष्ये**, **वसिष्ठधर्मसूत्रे**, **गौतमधर्मसूत्रभाष्ये** मस्करिकृते, **मनुस्मृतिभाष्ये** मेधातिथिकृते, **याज्ञवल्क्यस्मृत्यपरार्कव्याख्याने** बालक्रीडाटीकायाञ्च, **स्मृतिचन्द्रिकायां**, **शुद्धिकौमुदीग्रन्थे**, **यतिधर्मसंग्रहे** विश्वेश्वर्यां, **समयप्रकाशे** च काठकब्राह्मणोल्लेखः शास्त्रकृद्भिः कृतः।

## कठशाखीयसाहित्यम्

प्राक्तनकाले प्रतिग्रामं प्रथितायाः कठशाखायाः श्रुतिसूत्रादिसाहित्यमद्यत्वे विरलप्रायमुपलभ्यत इति महत्त्खेदावहम्। तथाप्यत्र कठशाखासम्बद्धं साहित्यं नामपरिचायनधिया सङ्गृह्यते।

एतेष्वाद्या काठकसंहिता इठिमिकादिपञ्चग्रन्थात्मिका 3093 मन्त्ररूपा 18000 मन्त्र - ब्राह्मणोभयात्मकयजूरूपा श्रोडरवर्येण 1910 वत्सरे प्रकाशिता, सातवलेकरवर्येण 1942 वर्षे पुनः सम्पादिता समुपलभ्यते। काठकश्रौतोल्लेखानां काठकसङ्कलननाम्ना प्रकाशनं डा. रघुवीरेण (1928, 1934) डा. सूर्यकान्तेन (1942 वर्षे) च विहितम्।

कठशाखीयं बहुत्र सङ्केतितं शताध्ययनब्राह्मणं सम्प्रति विलुप्तं सम्भवतः शताध्यायात्मकं शतपथवत् बृहदासीदित्यनुमीयते। काठकप्रश्नः **तैत्तिरीयब्राह्मणे** ऽपि दृश्यत इति विशेषः। कठारण्यकं Michael Witzel द्वारा रोमनलिप्यां सम्पादितं भारते देवनागराक्षरेषु प्रकाशनं प्रतीक्षते। कठोपनिषदध्यायद्वयात्मिकाष्टादशोत्तरशतमन्त्ररूपा प्रसिद्धा।

विष्णु-धर्मसूत्रं स्मृतिश्च कठशाखीयधर्मशास्त्रमिति वैजयन्तीटीकाकृता प्रत्यपादि। काठकश्रौतोद्धरणानि सार्धशताधिकस्थानेषूपलब्धानि पूर्वोक्तकाठकसङ्कलननाम्ना प्रकाशितानि, कर्कदेवयाज्ञिकादिभिः कात्यायनश्रौतव्याख्याने बहुशः समुद्धृतानि, गृह्यव्याख्याकृतो देवपालस्य मतेन एकोनचत्वारिंशदध्यायात्मकं सम्प्रत्यनुपलब्धं काठकश्रौतसूत्रं स्मारयन्ति। काठकगृह्यसूत्रं W. Caland वर्येण (1925) पं. भगवद्दत्तमहाशयेन च सम्पाद्य मुद्रापितमास्ते। अत्र श्रीहरिपालसुतदेवपालकृतं पञ्चिकाख्यं, माधवाध्वर्युतनयब्रह्मबलकृतं गृह्यपद्धतिर्मन्त्रसंहितासमाख्यं, आदित्यदर्शनविवरणाख्यं च भाष्यत्रयमस्ति। एतत्सम्बद्धं लौगाक्षिप्रणीतं गृह्यसूत्रं मधुसूदनकौलेन (1928, 1934) काश्मीर-ग्रन्थमालायां श्रीनगरे प्रकाशितम्।

अन्येऽपि ग्रन्थाः **काठकगृह्यकारिका**, भगवद्दत्तसम्पादितः **चारायणीयमन्त्रार्षाध्यायः**, इत्याद्याः सन्ति कठशाखासम्बद्धा इति शम्।

* * *